International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 20-24
© 2026 IJMH
www.themultijournal.com
Received: 24-06-2026
Accepted: 10-07-2026
Publish : 11-07-2026

**हरेकृष्णताण्डि**
अनुसन्धाता,
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः
नामाङ्कन संङ्ख्या-20VVEED048

**Correspondence:**
**हरेकृष्णताण्डि**
अनुसन्धाता,
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः
नामाङ्कन संङ्ख्या-20VVEED048

# उत्कलमणिगोपबन्धुदासस्य शैक्षिकयोगदानम्
# Educational Contribution of Utkalamani Gopabandhudas

**हरेकृष्णताण्डि**

**मुख्यशब्दाः (Key words):** शैक्षिकयोगदानम्, शिक्षायाः अर्थः, उद्देश्यानि, पाठ्यचर्या, अनुशासनम्, अध्यापकः, सत्यवादी वन विद्यालयः।

**प्रस्तावना (Introduction)**

पण्डितगोपबन्धुदासः एकः महान् कविः, शिक्षावित्, समाजसंस्कर्ता च आसीत्। सः जनेषु 'उत्कलमणिः' अर्थात् ओड़िशायाः रत्नम् इति नाम्ना अपि प्रसिद्धः आसीत्। तस्य विश्वासः आसीत् यत् भारतीयराष्ट्रस्य मुक्तिः राजनैतिकस्वतन्त्रतायाम् शैक्षिकजागरणानयने एव निहिता अस्ति। अतः यद्यपि सः भारतस्य स्वतन्त्रता आन्दोलने सक्रियत्वेन भागं गृहीतवान्, तथापि सः एकाम् स्वदेशीयाम् शिक्षापद्धतिं संस्थापयितुं प्रयतितवान्, या 'सत्यवादीपद्धतिः' इति कथ्यते।

गोपबन्धुदासस्य जन्म १८७७ तमस्य वर्षस्य अक्टूबरमासस्य ९ दिनाङ्के ओड़िशायाः पुरी-मण्डलस्य 'सुआन्डो' इति नामके लघुग्रामे अभवत्। तस्य पितुः नाम दैतारी दासः, मातुश्च नाम स्वर्णमयी देवी आसीत्। गोपबन्धुः १८९९ तमे वर्षे पुरीजिल्लाविद्यालयात् (Puri Zilla School) प्रवेशिकापरीक्षां (Matriculation) उत्तीर्णवान्। ततः परं कलाशिक्षाध्ययनाय रेवेन्शॉ-महाविद्यालयं (Ravenshaw College) प्रविष्टवान्। सः स्नातकोपाधिं सम्प्राप्य१९०६ तमे वर्षे विधिशास्त्रस्य (Law) उपाधिं लब्धवान्, एवं प्रकारेण तस्य औपचारिकशिक्षा पूर्णा अभवत्।

उच्चविद्यालये अध्ययनकाले सः मुक्तियारः रामचन्द्रदासनामकस्य एकस्य शिक्षकस्य प्रभावे आगतवान्। यः विपद्ग्रस्तां जनानां सहायतार्थं तत्परः राष्ट्रवादी आसीत्। विसूचिका (Cholera) रोगस्य प्रकोपेन ग्रस्तानां पीडितानां साहाय्यार्थं सहपाठिबालकानां सहकारभावेन सङ्घटनं कृत्वा सः 'पुरी सेवा समिति' नामिकाम् एकां स्वयंसेविसंस्थां प्रारभत। अस्याः संस्थायाः सदस्याः रोगग्रस्तानां सेवां कुर्वन्ति स्म तथा मृतानां दाहसंस्कारम् अपि कुर्वन्ति स्म। १९०९ तमे वर्षे गोपबन्धुः स्वकीयान् शैक्षिकविचारान् व्यवहारे परिणमयितुं पुरीमण्डलस्य साखीगोपालस्थाने **'सत्यवादीवनविद्यालयः'** इत्यस्य स्थापनां कृतवान्। तत्र सः 'डेक्कन एजुकेशन सोसाइटी' (Deccan Education Society) इत्यनया प्रभावितः अभवत्। या गुरुकुलपरम्परायाम् आधारिता आसीत् तथा उदारशिक्षायाः प्रदानाय लक्षिता आसीत्। तस्य विश्वासः आसीत् यत् जनानां स्वाभाविकीं स्वतन्त्रतां देशं प्रति च कर्तव्यं बोधयितुं शिक्षा अनिवार्या आसीत्। सः अमन्यत यत् शिक्षा बालकानां मानसिक-शारीरिक-आध्यात्मिक-विकासे साहाय्यं कर्तुं शक्नोति।

तस्य पद्धत्यां सर्वेषां जातीनां पृष्ठभूमीनां च बालकाः एकत्र उपवेष्टुं, सहभोजनं कर्तुं, सह अध्ययनं च कर्तुं शक्नुवन्ति स्म। विद्यालये आवसिकाशिक्षा (Residential Schooling), प्राकृतिकवातावरणे शिक्षणं, तथा गुरुशिष्ययोः मध्ये मधुरसम्बन्धः इत्यादयः विशेषांशाः आसन्। दासः पाठ्यसहगामीक्रियाकलापेषु (Co-curricular activities) बलं दत्तवान् तथा च शिक्षया छात्रेषु राष्ट्रियभावनायाः विकासं मानवसेवामूल्यस्य च शिक्षणं चिकीर्षति स्म। जनेभ्यः प्राप्तेन सकारात्मकप्रतिभावेन अत्यधिकं प्रेरितः भूत्वा, आगामिवर्षे सः एतं विद्यालयम् उच्चविद्यालयरूपेण परिवर्तितवान्। अस्य विद्यालयस्य सम्बद्धता कलकत्ता-विश्वविद्यालयेन (Calcutta University) सह अभवत् तथा च १९१४ तमे वर्षे प्रथमा

प्रवेशिका परीक्षा आयोजिता। पुनः १९१७ तमे वर्षे अस्य सम्बद्धता पटनाविश्वविद्यालयेन (Patna University) सह अभवत्। १९२१ तमे वर्षे एषः 'राष्ट्रियविद्यालयः' (National School) सञ्जातः। विद्यालयः आर्थिकसङ्कटस्य सम्मुखीकरणं कृतवान्, अन्ते च १९२६ तमे वर्षे बन्दीकृतः। अन्यत्र समयाभावात् दासः विद्यालये अधिकं शिक्षणं न कृतवान्, परन्तु सः अनौपचारिकरूपेण तस्य प्रबन्धकत्वेन कार्यं कृतवान्। सः धनसङ्ग्रहार्थं, पाठ्यचर्यायाः मार्गदर्शनाय, छात्रान् आकर्षयितुं च प्रयत्नं कृतवान्।

**गोपबन्धुदासस्य शैक्षिकदर्शनम् (Educational Philosophy of Gopabandhu Das)**

**शिक्षायाः अर्थः (Meaning of Education)**

उत्कलमणिगोपबन्धुदासस्य शिक्षाक्षेत्रे, विशेषतः सत्यवादी वन विद्यालयस्य स्थापनायां महत्त्वपूर्णं योगदानम् आसीत्। तस्य मते- "शिक्षयाः तात्पर्यं केवलं विद्यालये पाठनं नास्ति, शिक्षा सा अस्ति या प्राचीनभारतीयसंस्थासु समग्रप्रान्ते च धर्मकेन्द्रेषु प्रदीयते स्म।"

**सत्यवादीवनविद्यालयस्य बुनियादीशिक्षायाः पृष्ठभूमिः-**

गोपबन्धुदासस्य सत्यवादीवनविद्यालयस्य विचारः तस्य 'डेक्कन एजुकेशन सोसाइटी' (Deccan Education Society) इत्यनया सह सम्बद्धतायाः आगतः। या गुरुकुलपरम्पराधारिता आसीत्। तथा रूढिवादीनां ब्राह्मणानां विरोधे सत्यपि असम्प्रदायिकाधारे उदार-शिक्षां प्रदातुं लक्षिता आसीत्। सः अमन्यत यत् जनमानसेषु देशं प्रति कर्तव्यं बोधयितुं शिक्षा अनिवार्या आसीत्। सः चिन्तितवान् यत् शिक्षया बालकानां मानसिक-शारीरिक-आध्यात्मिकविकासे च साहाय्यं भवितव्यम्।

राष्ट्रियैकतायाः मनोभावं निर्मातुं गोपबन्धुः एतादृशीं शिक्षाप्रणालीं अकल्पयत्। या युवकान् छात्रान् च जीवनस्य सर्वोच्चलक्ष्याय (यथा देशसेवा, सामान्यकार्याय आत्मत्यागः, भावात्मकएकात्मताभावना च) प्रेरयेत्। बालस्य भाषायाः समाजस्य च भाषायाः उपरि आधारिता शिक्षा एव राष्ट्रियशिक्षाप्रणाल्याः मुख्यलक्ष्यम् अस्ति। सत्यवादीवनविद्यालये सः छात्रेषु एतानि मूल्यानि समये समये सञ्चारयितुं प्रयतितवान्।

**शिक्षायाः उद्देश्यानि (Aims of Education)**

- **वैश्विकशिक्षा (Universal Education):** गोपबन्धुदासः अनुभूतवान् यत् शिक्षा सर्वेभ्यः प्रदातव्या। जाति-वर्ण-पन्थ-धर्म-सामाजिक-आर्थिकस्थितिं विना मानवमानवयोः मध्ये कोऽपि भेदः न भवेत्। तस्य मते शिक्षायाः अधिकारः सर्वेषां समानः अस्ति। यथा सूर्यचन्द्रयोः किरणाः जनैः समानरूपेण प्राप्यन्ते, यथा च सर्वेषु युगेषु मानवसमाजाय धार्मिकोपदेशः प्रदीयते, तथैव शिक्षा अथवा मानसिकप्रकाशः अपि सर्वेभ्यः समानरूपेण दातव्यः। अतः सः वैश्विकशिक्षायाः पक्षधरः आसीत्।
- **निःशुल्कशिक्षा (Free Education):** गोपबन्धुः निःशुल्क-शिक्षायां विश्वसिति स्म। तस्य मते "शैक्षिकस्तरस्य ह्रासं विना शैक्षिकव्ययं न्यूनीकर्तुं बहवः मार्गाः सन्ति, एतदर्थं 'ग्रोव स्कूल' (Grove school - प्राचीनगुरुकुलपद्धत्याधारितम्) संस्थापयितुं प्रयत्नाः क्रियन्ते। अस्मिन् विद्यालये छात्रैः देयं शिक्षणशुल्कं न्यूनतमं भविष्यति तथा ते विद्यालयछात्रावासे सरलं संयमितं च जीवनं यापयिष्यन्ति।" अतः सत्यवादीविद्यालयस्य उद्देश्यं छात्रेभ्यः निःशुल्कशिक्षाप्रदानम् आसीत्। प्रारम्भिककाले छात्रेभ्यः न्यूनतमं शुल्कं गृहीतं, परन्तु किञ्चित्कालानन्तरं महात्मागान्धिमहोदयस्य आग्रहेण शुल्कं पूर्णतया समाप्तं कृतम्।
- **स्वावलम्बनाधारिता व्यावहारिकी शिक्षा (Self-reliant based practical education):** गोपबन्धुदासः आर्थिक-सन्तुलित-स्वावलम्बनशिक्षायां केन्द्रितः आसीत्। एतदर्थं ते स्वपाठ्यचर्यायां तान् विषयान् सम्मिलितवन्तः ये छात्रान् समाजे आर्थिकरूपेण स्वावलम्बिनः भवितुं साहाय्यम् आचरन्ति। तस्य मते- "वर्तमान-शिक्षाप्रणाली देशस्य युवानं जीवनसङ्घर्षाय सज्जं कर्तुं विफला अभवत्। ते आसन्द-उत्पीठिकाभ्यां (Chairs and tables) यत् कर्तुं शक्यते तदतिरिक्तं किमपि कर्तुं समर्थाः न सन्ति। तेभ्यः उपयुक्तानां शिल्पानां (Crafts) शिक्षणं तथा स्वजीविकार्जनयोग्यीकरणं च एका प्रमुखा समस्या अस्ति, एतदर्थं तेभ्यः केवलं शारीरिकव्यायामः न, अपितु उद्योगः कृषिः च अपि पाठयितव्याः।"
- **चरित्रविकासः (Character Development)** शिक्षायाः मूलं लक्ष्यं चरित्रनिर्माणम् एव अस्ति। चरित्रनिर्माणे सर्वासु परिस्थितिषु छात्रस्य नैतिक-बौद्धिक-सामाजिक-व्यवहाराः समाविष्टाः भवन्ति। छात्रेण शिक्षया व्यक्तित्वं, करुणा, दया, निष्पक्षता, समर्पणभावना च विकसिता भवेत्। तस्य मते, सर्वे छात्राः स्वस्य सदाचारेण समाजे एकः आदर्शपुरुषः भवेयुः। अतः गोपबन्धुदासः चरित्रनिर्माणे बलं दत्तवान्, यतोहि यदि चरित्रं नष्टं तर्हि सर्वं नष्टम्।
- **व्यक्तित्वस्य सर्वाङ्गीणविकासः (All Round Development of Personality)** गोपबन्धुः व्यक्तित्वस्य सर्वाङ्गीणविकासस्य (शारीरिक-मानसिक-सामाजिक-आध्यात्मिक-विकासस्य) उपरि ध्यानं दत्तवान्। यतोहि सत्यवादी शिक्षापद्धतिः बालस्य समग्रव्यक्तित्वस्य विकासाय लक्षिता आसीत्। एषा पद्धतिः देशभक्तिं, भ्रातृभावं, सामाजिकगुणानां समावेशं, चरित्रनिर्माणं च बोधयति स्म। एतेषां गुणानां विकासाय गोपबन्धुः विभिन्नप्रकारकाणि पाठ्यसहगामीकार्याणि यथा साहित्यिककार्याणि, वादविवादप्रतियोगिताः, शैक्षणिकभ्रमणानि, शारीरिकव्यायामान्, क्रीडाः, प्रार्थना-सभाः च प्रारभत।
- **धार्मिक-नैतिक शिक्षा (Religious and moral education):** गोपबन्धुदासस्य शैक्षिकदर्शनं केवलम् उदारं नासीत्। अपितु नैतिकसिद्धान्तेषु धार्मिकमूल्येषु च आधारितम् आसीत्। तस्य शैक्षिकदर्शनस्य एकमात्रं लक्ष्यं देशाय तादृशान् सभ्यान् संस्कृतान् च व्यक्ति निर्माणम् आसीत्, ये राष्ट्रियविकासाय प्रसारे साहाय्यं कुर्युः।

- अतः तस्य मते "धार्मिक-नैतिक-उपदेशानां महती आवश्यकता वर्तते, यतोहि व्यापारवाणिज्यवत् भौतिकक्रियाकलापेषु अपि नैतिकतायाः मूल्यं भवति।"
- **महिलाशिक्षा (Women education):** गोपबन्धुदासः महिला-शिक्षायाम् अपि बलं दत्तवान्। सः विश्वसिति स्म यत् महिलाः सामाजिकपरिवर्तनस्य वाहिकाः सन्ति। तस्य मते, "एकस्य बालकस्य शिक्षायाः तथा एकस्याः बालिकायाः शिक्षायाः मध्ये कोऽपि भेदः न भवेत्।" अपि च सः अवदत् यत् अस्माभिः स्त्रीशिक्षायाः प्रति अवश्यं ध्यातव्यम्। महिलाः परिवारस्य राष्ट्रस्य च धनं सन्ति। ताः कौटुम्बिकजीवनस्य देव्यः सन्ति। अस्माभिः ताः सीता-सावित्री-सदृशेन चरित्रेण सह विकसिताः कर्तव्याः।

**पाठ्यचर्या (Curriculum)**

गोपबन्धुदासः मुख्यतया स्वामीदयानन्दसरस्वतीमहोदयस्य शैक्षिकदर्शनेन प्रभावितः आसीत्। तस्य मतम् आसीत् यत् छात्रेभ्यः पूर्णविकसिता पूर्णा च शिक्षा प्रदातव्या येन तेषां सर्वासां क्षमतानां विकासः भवेत् तथा ते स्वावलम्बिनः भवेयुः। एतदर्थं सः छात्राणाम् आवश्यकतानां वैविध्यं पूरयितुं त्रिविधशिक्षायाः निर्माणं कृतवान्। एताः आसन् **साधारणी शिक्षा (General Education)**, **ब्रह्मचर्यशिक्षा (Brahmacharya Education)**, तथा **लौकिकी शिक्षा (Social Education)**। एतासां विस्तृतं विवरणम् अधः दत्तम् अस्ति-

- **साधारणी शिक्षा-** एषा सामान्या शिक्षा सर्वकारीयविद्यालयेषु पाठ्यमानेन विषयेण प्रायः समाना आसीत्। सर्वकारीयविद्यालयेषु गच्छन्तः समानवयस्काः छात्राः अस्मिन् विभागे पठितुं शक्नुवन्ति स्म। एकं निश्चितस्तरं यावत् पठित्वा, ते सर्वकारीयविद्यालयं प्रवेष्टुं शक्नुवन्ति स्म अथवा इच्छन्ति चेत् अग्रिमम् अध्ययनं कर्तुं शक्नुवन्ति स्म। छात्रावासे स्थातुं छात्रैः मासिकशुल्कं देयम् आसीत्। परन्तु एतद् सर्वेषां कृते अनिवार्यं नासीत्, इच्छानुसारं स्थातुं शक्नुवन्ति स्म। छात्राः अस्मिन् विभागे ओड़िआ, आङ्ग्ल, हिन्दी, गणितं, विज्ञानं, भूगोलं, इतिहासम्, अर्थशास्त्रं च पठन्ति स्म।
- **ब्रह्मचर्यशिक्षा-** १२-१५ वर्षवयस्काः छात्राः अस्याः शिक्षायाः कृते गृह्यन्ते स्म। तेषाम् प्रवेशयोग्यता उच्चप्राथमिक उत्तीर्णता (Upper primary pass) आसीत्। एते छात्राः सामान्यछात्राणां कृते निर्धारितपाठ्यक्रमात् कांश्चित् भागान् (आङ्ग्ल, ओड़िआ, गणितं, इतिहासम्, अर्थशास्त्रं, विज्ञानं च) पठन्ति स्म, परन्तु तदतिरिच्य ते कांश्चित् विशेष विषयान् पठन्ति स्म ये केवलं तेषामेव कृते आसन्। तेषां नैतिकतायाः उत्तमव्यक्तित्वस्य च विकासे अधिकं बलं दत्तम्। तेषां कृते छात्रावासे वासोऽनिवार्यः आसीत् तथा एते छात्राः न्यूनातिन्यूनम् अष्टवर्षाणि यावत् पठितवन्तः भवेयुः। अध्ययनस्य प्रथमपञ्चवर्षाणि सामान्यज्ञानस्य तथा शास्त्राणां विज्ञानानां च समीक्षात्मकज्ञानस्य (व्युत्पत्तिः) सम्बद्धानि आसन्। अन्तिमत्रीणि वर्षाणि विशिष्टीकरणस्य (Specialisation) कालः आसीत् यत्र छात्रः कस्यचित् विशिष्टक्षेत्रस्य (यथा- चिकित्सा, संस्कृतं, इतिहासः इत्यादि) विवरणं शिक्षते स्म। परन्तु अस्यां श्रेण्यां छात्राः चयनेन गृह्यन्ते स्म।
- **लौकिकीशिक्षा (सामाजिकशिक्षा)** अस्य 'लौकिकीशिक्षा' विभागस्य उद्देश्यम् ओड़िशासदृशस्य उपेक्षितराज्यस्य कृते 'पल्लीशिक्षक' (Rural teacher) तथा 'पल्लीकर्मी' (Rural worker) निर्माणम् आसीत्, यत्र एतेषां उत्तीर्णछात्राणां द्वारा व्यापका जागरूकता अभियानम् सामाजिकोत्थानं च सम्भवं भवेत्। औपचारिकशिक्षायाः अथवा तथाकथित पारम्परिक'चाटसाली' शिक्षायाः सामान्यज्ञानं धारयन् १८-३० वर्षवयोसमूहस्य व्यक्तिः अत्र पठितुं शक्नोति स्म।

पाठ्यक्रमस्य अवधिः एकवर्षीयः आसीत्, परन्तु तेभ्यः केवलं त्रिमासं यावत् (फरवरी, मार्च, अप्रैल मासैः) पठितव्यम् आसीत्। यतोहि एतेषु त्रिषु मासेषु अधिकांशजनाः, तथाकथिताः कर्मकराः अपि निष्क्रियाः तिष्ठन्ति, ते च विभिन्नस्वावलम्बनक्रियाकलापान् ज्ञात्वा अस्य समयस्य लाभप्रदं उपयोगं कर्तुं शक्नुवन्ति स्म। लौकिकशिक्षायाः पाठ्यक्रमः अधः दत्तः अस्ति।

क. वृत्तपत्र-पठनम् (Newspaper Reading)
ख. इतिहासः भूगोलं च
ग. साहित्यम्
घ. पुराणानि
ङ. हिन्दी
च. आङ्ग्लभाषा
छ. शासनपद्धतिः (Governance)
ज. नियमाः अधिकाराश्च।

**पाठ्यसहगामी-क्रियाकलापः (Co-Curricular Activities)**

गोपबन्धुः पाठ्यसहगामीक्रियाकलापेभ्यः पर्याप्तं महत्त्वं दत्तवान्, यतोहि सः जानाति स्म यत् शिक्षा कक्षायाः चतुर्भ्यः भित्तिभ्यः सीमिता नास्ति। अस्याः अधिकांशः भागः औपचारिकप्रणाल्याः बहिः प्राप्यते। विद्यालये अधोलिखिताः पाठ्यसहगामीक्रियाकलापाः व्यवहारे आसन्।

- **साहित्यिकक्रियाकलापाः-** प्रत्येककक्षा हस्तलिखितां कक्षापत्रिकां (Class magazine) प्रकाशयितुं प्रेरिता आसीत्। शिक्षकैः सह प्रत्येकं सदस्यं विद्यालयपत्रिकायां स्वलेखनं प्रकाशयितव्यम् आसीत्।
- **कविसम्मेलनम्-** छात्राणां काव्यभावनां कल्पनाशक्तिं च पोषयितुं विभिन्नावसरेषु 'कविसम्मेलनम्' आयोज्यते स्म। तदतिरिच्य, प्रायः कविता-पाठ-प्रतियोगिताः अपि आयोज्यन्ते स्म। उभयोः अपि शिक्षक,छात्राः सहभागिनः भवन्ति स्म।
- **वादविवादप्रतियोगिताः-** गोपबन्धुः स्वछात्रान् कुशलवक्तॄन् वाग्मिनः च कर्तुं चिकीर्षति स्म। प्रति शनिवासरे विद्यालयस्य वादविवादसमितिः समकालीनघटनासु विभिन्न-समस्यानां चर्चायै मिलति स्म। सर्वेषां छात्राणां कृते उपस्थितिः अनिवार्या कृता आसीत्।
- **शैक्षणिकभ्रमणानि (Excursions)-** देशभक्तिभावनां जागरयितुं तथा ओड़िशायाः प्राचीनगौरवं पुनः स्मर्तुं, छात्रान् प्रतिवर्षं

- ऐतिहासिक-भौगोलिक-महत्त्वपूर्णस्थानेषु नीयन्ते स्म। अस्य वैशि-ष्ट्यम् एतद् आसीत् यत् छात्रैः एषा दूरी पादचारेणैव (On foot) पूरणीया आसीत्। वाहनेन यात्रा करणीया नासीत्। एतेन तेभ्यः वास्तविक-ओड़िशायाः प्रत्यक्ष-अनुभवः अभवत् तथा इतिहा-सभूगोलयोः ज्ञानं वर्धितम्। कोणार्कभ्रमणानन्तरं पण्डितनीलकण्ठः स्वस्य प्रसिद्धं गीतं "कोणार्क" अलिखत्।
- **शारीरिकव्यायामः क्रीडाश्च-** प्रत्येकस्य छात्रस्य कृते प्रत्यूषे शय्यां त्यक्त्वा स्वस्थतायै विभिन्नव्यायामान् कर्तुं अनिवार्यम् आसीत्। एतेन तेषां शारीरिकविकासेन सह चरित्र-अनुशासन-सामाजिक-गुणानां च विकासः अभवत्। बासुदेवमहापात्रः शारीरिक प्रशिक्षकः आसीत्।
- **प्रार्थनासभा:-** सत्यवादीविद्यालये प्रत्येकं दिनं प्रार्थनासभया सह आरभ्यते स्म। या सर्वेषां कृते अनिवार्या आसीत्। एतासु सभासु नैतिकोपदेशाः धार्मिकसंवादाः च आयोज्यन्ते स्म।

**शिक्षणविधयः (Methods of teaching)**

गोपबन्धुदासः पारम्परिकशिक्षणविधेः अथवा व्याख्यानविधेः (Lecture method) पक्षपाती नासीत्। सः सुकरातमहोदयस्य **चर्चाविधिम् (Discussion Method)** अधिकं रोचयते स्म। प्रधानाचार्यः शिक्षकाश्च एकेन विशालेन सभासदे उपविश्य छात्राणां विद्यालयस्य च समस्यानां परस्परं चर्चां कुर्वन्ति स्म। अपि च प्रत्येकस्य शिक्षकस्य कृते कालावधेः (Period) आरम्भे पूर्वकक्षायां पाठितानां पाठ्यक्रमाणां चर्चायै पञ्चदश निमेषान् दातुं तथा छात्राणाम् अभ्यासपुस्तिकाः सङ्ग्रहीतुं नियमितव्यवहारः आसीत्। याः शिक्षकाः गृहं नीत्वा महता सावधानेन परीक्षन्ते स्म। कालावधेः अन्ते शिक्षकाः तस्मिन् काले पाठिते विषये प्रश्नान् पृच्छन्ति स्म।

**शिक्षकः (Teacher)**

सत्यवादीवनविद्यालये सर्वेषु क्रियाकलापेषु शिक्षकस्य महती भूमिका आसीत्। एते शिक्षकाः केवलं कर्मठसक्रियाः एव नासन्, अपितु स्वकार्ये हृदयेन उत्सहेन च समर्पितचित्ताः आसन्। ते छात्रेभ्यः समग्रसमाजाय च आदर्शाः आसन्। ते उच्चशिक्षिताः व्यक्तयः आसन्। ते छात्रैः शुल्कत्वेन दत्तेन स्वल्पेन धनेन जीवन्ति स्म, परन्तु विद्यालयसमयात् परम् अपि दीर्घकालं यावत् स्वकर्तव्यं पालयन्ति स्म। ते उच्चमनोबलधारिणः बहुमुखीप्रतिभावन्तः च आसन्, ये स्वकीर्तिं समग्रओड़िशायां प्रसरन्ति स्म। ते छात्राणां प्रश्नैः कदापि उद्विग्नाः न भवन्ति स्म, अपितु तेषां शङ्कानां निवारणं स्वकीय पवित्रकर्तव्यं मन्वते स्म। ते छात्राणां वास्तविकाः मित्राणि, दार्शनिकाः, मार्गदर्शकाः च आसन्। नियमितकक्षाशिक्षणस्य अति-रिक्तं, प्रत्येकस्य शिक्षकस्य कृते किमपि अतिरिक्तं कर्तव्यम् आसीत्। यथा छात्रावासस्य रक्षणं, छात्रानुशासनं, वादविवादचर्चा, क्षेत्रभ्रमणयात्रा, प्रातःकालीनसभाप्रार्थना, जलप्रलयकाले विच्छि-न्नेभ्यः जनेभ्यः साहाय्यं सामग्रीवितरणम् इत्यादि। एतेषु समर्पितसाधुहृदयेषु केचन पण्डितनीलकण्ठ दासः, पण्डित-गोदावरीश मिश्रः, आचार्यहरिहरः, पण्डितबासुदेव महापात्रः च आसन्। एतदर्थं गोपबन्धुना उपयुक्तमुक्तम्-

"एकः विद्यालयः केवलं भवनेन, आसन्देन, उत्पीठिकया च न भवति; तत्र शिक्षिताः, निष्कपटाः, आदर्शवादिनः च शिक्षकाः भवितव्याः।"

**शिक्षणमाध्यमत्वेन मातृभाषा (Mother Tongue as a Medium of Instruction)**

गोपबन्धुः अनुभूतवान् यत् बालकानां बालिकानां च शिक्षणाय मातृभाषा एव एकमात्रं वास्तविकं माध्यमम् अस्ति। यतोहि एषा तेषां संज्ञानात्मकक्षमतां (Cognitive capacity), मौलिकतां, रचनात्मकताम् च उच्चतमस्तरं यावत् विकासयति। कस्यचित् विषयस्य उपरि छात्रस्य ग्रहणं (Grasp) तदैव अधिकतमं भवति यदा सः स्वमातृभाषया पाठ्यते। अपि च मातृभाषामाध्यमेन शिक्षणं छात्राय स्वसांस्कृतिक-सामाजिक-व्यवस्थानां अधिक-अर्थपूर्णरूपेण शिक्षणे साहाय्यं करोति। निर्देशः पूर्णतया मातृभाषा माध्यमेन दीयते स्म। एतद् अनुभूतं यत् मातृभाषायाः उपयोगं विना शिक्षा प्रदातुं न शक्यते। गोपबन्धुः लॉर्ड-मैकाले (Lord Macauley) महोदयस्य तस्य विचारस्य विरोधी आसीत्। यः प्रादेशिकभाषायाः ह्रासं कर्तुं तथा युवानां मध्ये तस्याः प्रति घृणाभावनां निर्मातुम् इच्छति स्म। तस्य मते "कापि शिक्षा राष्ट्रियशिक्षा नास्ति यदि छात्राः स्वमातृभाषया निर्दिष्टाः न क्रियन्ते।" छात्रः मातृभाषया विषयं सहजतया अवगन्तुं शक्नोति तथा च आत्मानं मुक्ततया अभिव्यक्तं कर्तुं शक्नोति।

**अनुशासनम् (Discipline)**

गोपबन्धुः कठोरानुशासनस्य पक्षधरः आसीत्। छात्रावासः त्रिषु पृथक्भवनेषु विभक्तः आसीत् तथा विभिन्न-शिक्षकाणां पर्यवेक्षणे आसीत्। प्रत्येकस्मिन् भागे त्रयः पृथक्-अनुवीक्षकाः (Monitors) आसन्। एकः अध्ययनपर्यवेक्षणाय, द्वितीयः व्यय-लेखा-रक्षणाय, तृतीयश्च बाह्य-व्यवहाराय नियम-बाह्य-कार्याणां (यदि किमपि अस्ति तर्हि) निरीक्षणाय। एवं प्रकारेण नव अनुवीक्षकाः आसन् तथा ते स्वकर्तव्यानां कठोरसतर्कतया निरीक्षणं कुर्वन्ति स्म। समये समये ते एकस्यां सभायां मिलित्वा स्वविषयाणां विभिन्नाः लघुसमस्याः समादधति स्म। एषा सभा **'छात्र अदालत'** इति उच्यते स्म। तदतिरिच्य यदि कश्चित् महतः अपराधस्य विषयः भवति स्म, तर्हि सः सम्बद्धपर्यवेक्षकस्य अथवा प्रधानाचार्यस्य ज्ञाने आनेतव्यः आसीत्।

**मुक्ताकाशविद्यालयः (Open-air Schools)**

यदा मुक्ताकाशविद्यालयः संस्थापितः तदा गोपबन्धुः दृढतया अवदत् "वैश्विकशिक्षासङ्घस्य (Universal Education league) संस्थापकानां विश्वासः अस्ति यत् शिक्षायाः अधिकारः सर्वेषां समानः अस्ति। यथा सूर्यचन्द्रयोः किरणाः जनैः समानरूपेण प्राप्यन्ते, यथा च छात्रेभ्यः धार्मिकोपदेशः प्रदीयते।"

## सामुदायिकजीवनरूपेण शिक्षा (Education as a Community Living)

गोपबन्धुः अनुभूतवान् यत् शिक्षा सर्वदा छात्रसमूहे सामुदायिक-भावनायाः सहकारस्य च वर्धनाय प्रयतितव्या। एतदर्थमेव सः विद्यालयं पूर्णतया आवसिका (Residential) कृतवान्, यत्र शिक्षकच्छात्रैः उभयैः स्थातव्यम् आसीत्। तस्य मते एतेन शिक्षक-छात्रयोः मध्ये स्वस्थसम्बन्धः वर्धते। शिक्षकाः ज्येष्ठभ्रातरः इव आसन् ये यदा यत्र च आवश्यकता भवति स्म, छात्राणाम् साहाय्यं कुर्वन्ति स्म। सत्यवादीवनविद्यालयस्य छात्रावासः छात्रेषु सर्वाङ्गीण-विकासं आनेतुम् एक आदर्शलक्षणेन सङ्घटितः आसीत्। आवासिनः (Boarders) स्वसामुदायिकभोजनाय, प्रार्थनाय, सांस्कृतिक-कार्यक्रमेभ्यः, भ्रमणाय, विभिन्नानां पाठ्यसहगामीसामाजिकक्रिया-कलापानां सङ्घटनाय च प्रायः परस्परं मिलन्ति स्म।

## उपसंहारः (Conclusion)

गोपबन्धुदासस्य शैक्षिकदर्शनं सर्वकालिकं दर्शनम् अस्ति। तस्य दार्शनिकविचाराणां सिद्धान्तानां च विश्लेषणानन्तरं वयं वक्तुं शक्नुमः यत् तस्य दर्शनं नूतन-राष्ट्रस्य निर्माणाय एकः आधारः इव अस्ति। सः अस्माकं राष्ट्रं गरुड़दृष्ट्या अपश्यत्, स्वस्य सत्यवादीशिक्षाप्रणाल्याः निर्माणं च कृतवान्। तेन संस्थापितः विद्यालयः स्वतन्त्रतानन्तरं नवीकृतायां स्थितौ अद्यापि तत्रैव वर्तते। तस्य दर्शनं वर्तमानशिक्षाप्रणाल्या बहुधा विस्मृतं, परन्तु वयं कदापि अस्य व्यवहारं न कृतवन्तः। तस्य शिक्षायाः सहसम्बन्धीकरणस्य अवधा-रणा अपि महती आसीत्। सत्यवादीस्थाने तस्य प्रयोगः एतद् सफलतापूर्वकं सिद्धवान्। विद्यालयस्य बहवः उत्तीर्णछात्राः अनन्तरं समाजस्य विभिन्नक्षेत्रेषु उच्चपदानि प्राप्तवन्तः। तेन तस्य सहपाठिभिः च कृताः प्रयासाः प्रयत्नाश्च तस्मै सफलतायाः द्वारं उद्घाटितवन्तः। यतोहि तत्कालीन ओड़िशायाः सर्वेभ्यः भागेभ्यः छात्राः आगन्तुं प्रारभन्त। प्रयोगः सफलः आसीत् परन्तु तस्य असमये मृत्योः कारणात् बृहत्तरे क्षेत्रे तस्य दर्शनस्य क्रियान्वयनं विफलम् अभवत्। तथापि सः एकः उत्कृष्टः शिक्षावित् आसीत् भविष्यति च। गोपबन्धोः जीवनं विचाराश्च अद्यापि जगतः प्रत्येकस्मिन् क्षेत्रे एकं वैश्विकं दर्शनं वर्तते।

## सन्दर्भाः (References)


१. भाटिया, के.के. (१९८९). *Principles of Education.* नई दिल्ली कल्याणी पब्लिकेशन्स.

२. दास, जी. (१९७६). *Gopabandhu Rachanabali, Part-1.* कटक गोपबन्धु साहित्य मन्दिर.

३. दाश, एस. सी. (१९६४). *Pandit Gopabandhu- A Biography.* कटक गोपबन्धु साहित्य मन्दिर.

४. मिश्र, सी. (२०१०). *Satyavadire Satabarsha.* कटक कटक स्टूडेंट्स स्टोर.

५. मिश्र, डी. (२००९). *Shahebarshara Satyavadi Bana Vidyalaya.* कटक बसन्त पब्लिकेशन.

६. महापात्र, आर.एल. (२०२१). *A study on the educational locale of pandit Gopabandhu das: a bird's view.* ResearchGate publication 2021.

७. महापात्र, आर.एल. (२०१२). *A study on swaraj Sarvodaya and education in India with special reference to Gopabandhu Das.* A thesis submitted to Assam University, Silchar.

८. पण्डा, ए.के. (२०१८). *A study on Satya Badi Bana Vidyalaya of pt. Gopabandhu Das: A case study in educational leadership 2018.*

९. राव, बी. एन. (२०१८). *A study on Mahatma Gandhi's contribution to education and its relevance to the present day.* http://www.joel.in

१०. रथ, एन. (२०११). *A study on Gopabandhu Das: The national education planner of Odisha.* Orissa review 2011.